सहनर्त्तनं, क्ली, (सह मिलित्वा नर्त्तनम् । एकत्र मण्डलाकारनृत्यकरणम् । इति केचित् ॥

सहपांशुकिलः, पुं, (सह पांशुना रजसा किलति क्रीड़तीति । किल क्रीड़ने + कः ।) वयस्यः । इति त्रिकाण्डशेषः ॥

सहपानं, क्ली, (सह मिलित्वा पानम् ।) एकत्र मद्यभक्षणम् । तत्पर्य्यायः । सपीतिः २ । इति हेमचन्द्रः ॥ तुल्यपानम् ३ । इत्यमरः ।२।८।५५॥ सहपीतिः ४ । इति शब्दरत्नावली ॥

सहपूर्व्वाह्णं, क्ली, (पूर्व्वाह्णस्य सदृशम् । "अव्ययीभावे चाकाले । ६।३।८१। इत्यत्र अकाले इति कथनात् न सादेशः ।) पूर्व्वाह्णसदृशम् । इति मुग्धबोधव्याकरणे अव्ययीभावसमासः ॥

सहभावी, [न्] त्रि, (सह भवतीति । भू + णिनिः ।) सहायः । इति त्रिकाण्डशेषः ॥

सहभोजनं, क्ली, (सह मिलित्वा भोजनम् ।) एकत्र भक्षणम् । तत्पर्य्यायः । सग्धिः २॥ इत्यमरः । २।८।५५ ॥ (सहभोगकरणम् । यथा, महाभारते । १ । १८६ । २४ ।
एष नः समयो राजन् रत्नस्य सहभोजनम् ।
न च तं हातुमिच्छामः समयं राजसत्तम ॥")

सहमरणं, क्ली, (सह पत्या मरणम् ।) मृतस्वामिसहितज्वलच्चितारोहण-पूर्व्वकमरणम् । यथा । "अथ सहानुगमनम् । अङ्गिराः ।
'मृते भर्त्तरि या नारी समारोहेद्धुताशनम् ।
सारुन्धतीसमाचारा स्वर्गलोके महीयते ॥
तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे ।
तावन्त्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति ॥
व्यालग्राही यथा व्यालं बलादुद्धरते विलात् ।
तद्वद्भर्त्तारमादाय तेनैव सह मोदते ॥
मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते ।
पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति ॥
तत्र सा भर्त्तृपरमा परा परमलालसा ।
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश ॥"
भर्त्तृपरमा भर्त्ता परमो यस्याः सा तथा । परा परमलालसेत्यत्र स्तूयमानाप्सरोगणैरिति व्यासेन पठितम् ।
'ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः ।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम् ॥
साध्वीनामेव नारीणामग्निप्रपतनादृते ।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्
या नारीत्युपादानात् सहमरणाभावपक्षोऽपि सूचितः । नान्यो धर्म्म इति तु सहमरणस्तुत्यर्थम् । तथा च विष्णुः । मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति । ब्रह्मचर्य्यमैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च । यथा प्रचेताः ।
'ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्ज्जयेत् ॥'
अभ्यञ्जनमायुर्व्वेदोक्तं पारिभाषिकम् । यथा,
'मूर्द्ध्नि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतम् ।
स्रोताभिस्तर्पयेद्देहं अभ्यङ्गः स उदाहृतः ॥
तैलमल्पं यदाङ्गेषु न च स्याद्देहतर्पणम् ।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः ॥'
स्मृतिः ।
'एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुस्तिलकुशोदकैः ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम् ॥'
एतत् तु तर्पणं पुत्त्रपौत्राद्यभावविषयमिति मदनपारिजातः ॥
'वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥'
अत्र साध्वीत्वमाह ।
'आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता ॥'
छन्दोगपरिशिष्टीयमिति कल्पतरुः ॥ साध्वीप्रसादेन लोकधारणमप्याह ॥ मत्स्यपुराणम् ।
'तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः ।
तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम् ॥'
महाभारते ।
'अवमत्य च याः पूर्व्वं पतिं दुष्टेन चेतसा ।
वर्त्तन्ते याश्च सततं भर्त्तृणां प्रतिकूलतः ॥
भर्त्रनुमरणं काले याः कुर्व्वन्ति तथाविधाः ।
कामात् क्रोधात् भयान्मोहात् सर्व्वाः पूता भवन्ति ताः ॥'
अत्र ऐहिकब्रह्मघ्नपतेर्दाहनिषेधात् जन्मान्तरीयतत्पापवत एव सहमरणेनोद्धारः । ब्रह्मपुराणे ।
'देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् ॥'
ऋग्वेदवादात् इमा नारीरविधवा इत्यादिमन्त्रात् । एवञ्च अङ्गिरोब्रह्मपुराणवचनपर्य्यालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वगतभर्त्तृगतफलविशेषार्थिनीनां गर्भवतीबालापत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकार इति विवादकल्पतरुरत्नाकरौ । तत्र ब्राह्मण्या अनुमरणाधिकारोऽसङ्गतस्तस्यास्तन्निषेधात् । तथा च मिताक्षरायां देवबोधकृतयाज्ञवल्क्यटीकायाञ्च गौतमः ।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
इतरासान्तु नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः ॥'
तस्माद्ब्राह्मण्याः सहमरणमेव इतरासान्तु उभयमिति । कल्पतरुरत्नाकरशुद्धिचिन्तामणिषु पादुकाद्वयमिति दर्शनात् पादुकादिकमित्यपपाठः किन्तु पादुकाद्वयमित्युपलक्षणम् । उशनसा विप्रेतरासां द्रव्यविशेषमनुपादाय पृथक्चित्यारोहणमात्रोक्तेः । यथोशनाः ।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासामेव नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः ॥'
मदनपारिजातोऽप्येवम् । शिष्टाचारोऽपि तथा । कृत्यतत्त्वार्णवे वृहन्नारदीयम् ।
'बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वला राजसुते ! नारोहन्ति चितां शुभे ॥'
राजसुते इति सगरमातुः सम्बोधनम् । वृहस्पतिः ।
'बालसम्बर्द्धनं त्यक्त्वा बालापत्या न गच्छति ।
रजस्वला सूतिका च रक्षेद्गर्भञ्च गर्भिणी ॥'
एवमन्यतश्चेद्बालस्य संवर्द्धनं स्यात् तदा तस्या अप्यधिकारः । व्यासः ।
'दिनैकगम्यदेशस्था साध्वी चेत् कृतनिर्णया ।
न दहेत् स्वामिनं तस्या यावदागमनं भवेत् ॥'
भविष्यपुराणे ।
'तृतीयेऽह्नि उदक्याया मृते भर्त्तरि वै द्विजाः ।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम् ॥'
तस्य भर्त्तुः । तथा,—
'एकां चितां समासाद्य भर्त्तारं यानुगच्छति ।
तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियाञ्चरेत् ॥'
एतच्च पिण्डदानपर्य्यन्तम् ।
'यश्चाग्निदाता प्रेतस्य पिण्डान्दद्यात् स एव हि ।'
इति वायुपुराणैकवाक्यत्वात् ॥
ब्रह्मपुराणे ।
'श्रावयेद्भर्त्तृजायान्तु स्वभर्त्तृकुलपामिमाम् ।
चितामारोपयन् प्राज्ञः प्रसृते धर्म्ममुत्तमम् ॥
इमाः पतिव्रताः पुण्याः स्त्रियो या याः सुशोभनाः ।
सह भर्त्तृशरीरेण संविशन्तु विभावसुम् ॥
एवं श्रुत्वा ततो नारी श्रद्धाभक्तिसमन्विता ।
पितृमेधेन यज्ञेन इष्ट्वा स्वर्गमवाप्नुयात् ॥'
प्रसृते भर्त्तरीति शेषः । पितृमेधेन यज्ञेन चितारोहणरूपेण । पादुकाद्वयग्रहणपूर्व्वकानुमरणेऽपि सह भर्त्तृशरीरेण इत्यनूहः प्रयोज्यः । देशान्तरमृते पत्यावित्यादिना शरीरप्रतिनिधित्वेन तदीयद्रव्यविधानात् प्रतिनिधौ च यथाश्रुतमन्त्रपाठमाह कात्यायनः । शब्देऽविप्रतिपत्तिः इत्येतत् विवृतमेकादशीतत्त्वे ॥ *॥ न च अग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरमृतानां गर्भाणां जातदन्तानां मरणे त्रिरात्रेण शुद्धिः । इति काश्यपवचनात् सहमृताया अप्यग्निप्रवेशेन त्रिरात्राशौचं तत्रैव तस्याः पिण्डदानमिति वाच्यम् । प्रागुक्तब्रह्मपुराणे पृथक्चितिसमारोहणमात्रे त्र्यहाशौचविधानात् अन्यत्र भर्त्तृतुल्याशौचप्रतीतेः । सहमरणे काश्यपोक्तत्रिरात्राशौचाङ्गीकारेऽपि तस्याशौचस्य वृद्धा पत्यशौचकालावधिस्थायित्वम् ॥
'अन्तर्दशाहे स्यातां चेत् पुनर्म्मरणजन्मनी ।
तावत् स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशम् ॥'
इति मन्क्ताशौचसङ्करे पराशौचस्य पूर्व्वाशौचकालावधिस्थायित्वप्रतीतेः । ततश्च दशाशौचकालसङ्कोचे तन्मध्य एव सङ्कलय्य पिण्ड-